International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 81-83
© 2026 IJMH
www.themultijournal.com

Received: 13-05-2026
Accepted: 05-06-2026
Publish : 06-06-2026

**निताइबिश्वासः**
शोधच्छात्रः,
अनुसन्धानप्रकाशनविभागः.
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

**Correspondence:**
**निताइबिश्वासः**
शोधच्छात्रः,
अनुसन्धानप्रकाशनविभागः.
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

# स्कन्दपुराणे श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये मुक्तिविमर्शः

**निताइबिश्वासः**

**सारांशः (Summary)**

वैष्णवागमेषु (विशेषतः पाञ्चरात्र-वैखानसागमेषु) चतुर्षु पादेषु 'ज्ञानपादः' एव दर्शनस्य, जीवन्मुक्तेः, मोक्षस्य च तात्त्विकं स्वरूपं प्रस्तौति। अत्र मोक्षः केवलं संन्यासात्मिकः नास्ति, अपितु भगवत्प्रपत्त्या (शरणागत्या) सह सायुज्यादिसम्बन्धमयः भवति। संसारः भगवतः तिरोधानशक्त्या (मायया) भवति, मोक्षश्च तस्य अनुग्रहशक्त्या (प्रसादेन) जायते। सर्वक्लेशकर्मबन्धनानां निवृत्तिः एव मोक्षः, यत्र जीवः स्वकीय-सच्चिदानन्दस्वरूपे अवतिष्ठते। लक्ष्मीनारायणयोः अभेदमूलकं ज्ञानं मोक्षप्रदं भवति तथा च शरणागतिः एव सर्वमोक्षप्रदायिनी अस्ति। ब्रह्मणि जीवस्य लयः तोये (जले) क्षिप्तं तोयं यथा तन्मयं भवति, तथा सायुज्यमुक्तिरूपेण वर्णितः अस्ति। अत्र जीवन्मुक्तेः सिद्धान्तः स्वीकृतः अस्ति, यस्यानुसारं यस्य चित्तं श्रीहरौ लीनं जातं, सः संसारे तिष्ठन् अपि जीवन्नेव विमुक्तः अस्ति। भृगुसंहितायाम् मोक्षस्य क्रमिकविकासाय चत्वारः भेदाः वर्णिताः सन्ति - सालोक्यं (विष्णुलोके निवासः), सामीप्यं (भगवतः निकटता), सारूप्यं (भगवद्रूपप्राप्तिः), सायुज्यं च (परब्रह्मणि पूर्णप्रवेशः)। स्कान्दे वायसकथा (काककथा)माध्यमनेन स्पष्टीकृतं यत् एकः सामान्यः पक्षी अपि क्षेत्रप्रभावेण चतुर्भुजधारी भूत्वा विष्णुसादृश्यं (सारूप्यं) प्राप्नोति। पुरुषोत्तमक्षेत्रे प्रविष्टः जीवः सांद्रसुखस्वरूपं प्राप्य पुनः गर्भवासं न लभते। ज्ञान-श्रवणादिकं विनापि केवलं क्षेत्रे प्राणत्यागेन तत्क्षण एव मुक्तिः भवति। पुण्डरीकस्य स्तुतौ अष्टाङ्गयोगात् अपि भक्तिः श्रेष्ठा उक्ता, यया घोरसंसारसागरः सुलभतया तीर्यते। पुण्डरीकाक्षस्य दिव्यदर्शनेन कल्पकोटिजन्यपापानां नाशः भवति तथा च विष्णुभक्तेः प्रसादात् राजा इन्द्रद्युम्नः मर्त्यशरीरेणापि जीवन्मुक्तः सन् ब्रह्मलोकं गतः।

**कूटशब्दाः (Keywords)** - मुक्तिविमर्शः, भगवत्प्रपत्तिः (शरणागतिः), सायुज्यमोक्षः, जीवन्मुक्तः, मोक्षचतुष्टयम् (सालोक्य-सामीप्य-सारूप्य-सायुज्याः), वायसकथा, पुनरावृत्तिरहितमोक्षः, अन्तर्यामी, विष्णुभक्तिप्रसादः, ज्ञानपादः ।

वैष्णवागमेषु (विशेषतः पाञ्चरात्र-वैखानसागमेषु) चतुर्षु पादेषु (ज्ञान-योग-क्रिया-चर्यापादेषु) 'ज्ञान-पादः' एव दर्शनस्य, जीवन्मुक्तेः, मोक्षस्य च तात्त्विकं स्वरूपं प्रस्तौति । आगमोक्तज्ञानपादे मोक्षस्य स्वरूपं केवलं संन्यासात्मिकं नास्ति, अपितु तत् **'भगवत्प्रपत्तिः' (शरणागतिः)** तथा च भगवता सह **'सायुज्य-सामीप्यादि'**सम्बन्धमयं वर्तते ।

वैष्णवागमीयासु मुख्यसंहितासु (अहिर्बुध्न्य-पाद्म-लक्ष्मी-पौष्कर-जयाख्य- संहितासु) मोक्षनिरूपणं बहुधा क्रियते । वैष्णवागमानुसारेण संसारः भगवतः 'तिरोधानशक्त्या' (मायया) भवति, मोक्षश्च तस्य 'अनुग्रहशक्त्या' (प्रसादेन) जायते । मोक्षकाले जीवः प्रकृतेः गुणत्रयात् (सत्त्व-रज-तमोभ्यः) मुक्तः भूत्वा स्वकीयम् अलौकिकं, तेजोमयं, निर्विकारं च स्वरूपं प्राप्नोति ।

**अहिर्बुध्न्यसंहितायाम्** उक्तं यत् सर्वक्लेशकर्मबन्धनानां निवृत्तिः एव मोक्षः अस्तिः । तद्धि -

**सर्वथा क्लेशबन्धस्य निवृत्तिर्मोक्ष उच्यते ।**
**स्वरूपेणावस्थानं हि तदा जीवस्य जायते ॥**[1]

जीवस्य सर्वप्रकारकैः क्लेशैः, पाशबन्धैः च सर्वथा विमुक्तिः एव मोक्षः अस्ति । मोक्षावस्थायां जीवः स्वस्य वास्तविके सच्चिदानन्द-स्वरूपे अवस्थितः भवति।

आगमे ज्ञानपादे स्पष्टं प्रतिपादितं यत् केवलं शुष्कज्ञानेन मोक्षो न भवति, अपितु भगवति अनन्यशरणागत्या (प्रपत्त्या) एव मोक्षः सुलभो भवति । **लक्ष्मीसंहितायां** स्वयं महालक्ष्मीः मोक्षोपायं वदति:

**न मया रहितं ब्रह्म न चाहं ब्रह्मणो विना ।**
**मत्प्रसादात् परां सिद्धिं मोक्षरूपं च विन्दति ॥**
**शरणागतिरेवैका सर्वमोक्षप्रदायिनी ।**
**नारायणं परं देवं यः प्रपद्येत् स मुच्यते ॥**[2]

लक्ष्मी-नारायणयोः अभेदमूलकं ज्ञानं मोक्षप्रदं वर्तते । 'शरणागतिः' (प्रपत्तिः) एव एका तादृशी पद्धतिः अस्ति, या सर्वविधानां जीवानां कृते मोक्षं ददाति । यः भगवन्तं नारायणं प्रपद्यते, सः संसारात् मुच्यते।

वैष्णवदर्शने 'सायुज्य'मोक्षः (भगवत्स्वरूपताप्राप्तिः) सर्वश्रेष्ठः मन्यते, यत्र जीवः भगवतः दिव्यगुणानां सादृश्यं प्राप्नोति (परं सृष्टिचालनशक्तिं विना)। **जयाख्य-संहितायाः** ज्ञानपादे ब्रह्मणि जीवस्य लयः अतीव सुन्दरतया वर्णितः अस्ति । यथा -

**यथा तोये क्षिप्तं तोयं तोयमेव हि जायते ।**
**तथा जीवोऽपि विज्ञेयः परे ब्रह्मणि लीयते ॥**
**विमुक्तः प्राकृतैर्बन्धैः सायुज्यं प्रतिपद्यते ।**
**परमानन्दसन्दोहं भुङ्क्ते नारायणं गतः ॥**[3]

यथा जले जलं प्रक्षिप्तं सति तत् जलमयं एव भवति, तथैव मुक्तः जीवः परब्रह्मणि नारायणे लीनः भूत्वा तन्मयः भवति। सः प्राकृतबन्धेभ्यः विमुक्तः सन् सायुज्यं प्राप्नोति, भगवता सह अनन्तमहद्-आनन्दं च भुङ्क्ते।

**पाद्मसंहितायाः** ज्ञानपादे स्पष्टीकृतं यत् मोक्षः केवलं देहत्यागात् परं न भवति, अपितु संसारे तिष्ठन् अपि मनुष्यः जीवन्मुक्तः भवितुं शक्नोति, यदि तस्य चित्तं भगवति निश्चलं स्यात् । तद्धि -

**ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।**
**न चास्ति किञ्चित् कर्त्तव्यं अस्ति चेन्न स तत्त्ववित् ॥**
**जीवन्नेव विमुक्तोऽसौ यस्य चेतो हरिं गतम् ।**
**प्राकृतं वपुराभासं केवलं तस्य तिष्ठति ॥**[4]

यस्य योगिनः चित्तं श्रीहरौ लीनं जातम्, सः जीवन्नेव विमुक्तः (जीवन्मुक्तः) अस्ति । तस्य कृते संसारे किमपि कर्त्तव्यं न अवशिष्यते। तस्य प्राकृतं शरीरं केवलं प्रारब्धवशात् आभासमात्रं तिष्ठति, अन्ते च सः विदेहमुक्तिं प्राप्नोति ।

**वैखानसागमे (भृगुसंहितायाम्) मोक्षचतुष्टयम् -** वैखानसागमस्य ज्ञानपादे मोक्षस्य चत्वारः भेदाः - **सालोक्य-सामीप्य-सारूप्य-सायुज्याः** क्रमिकविकासदृष्ट्या निरूपिताः सन्ति । **भृगुसंहितायाम्** उक्तम् -

**विष्णोर्लोके निवासस्तु सालोक्यं मुनिपुङ्गव ।**
**सामीप्यं तस्य सान्निध्यं सारूप्यं तद्वदाकृतिः ॥**
**सायुज्यं तु परे ब्रह्मणि प्रवेष्टव्यं चामृतं भवेत् ।**
**एषा मोक्षगतिः प्रोक्ता वैष्णवे तन्त्रविस्तरे ॥**[5]

1. **सालोक्यम्:** विष्णोः दिव्यलोके (वैकुण्ठे) निवासः।
2. **सामीप्यम्:** भगवतः समीपवर्तित्वम् (निकटता)।
3. **सारूप्यम्:** भगवतः इव शङ्ख-चक्र-पीताम्बरादि-दिव्यचतुर्भुजरूपप्राप्तिः।
4. **सायुज्यम्:** परब्रह्मणि प्रविश्य पूर्णरूपेण अमृतत्व-एकीभाव-प्राप्तिः।

एवम् आगमोक्तज्ञानपादे मोक्षनिरूपणस्य सारः अयं वर्तते यत् — जीवः अणुशक्तियुक्तः अस्ति, भगवान् च विभुशक्तियुक्तः । मायावशात् जीवः स्वस्य विभुत्वं विस्मृत्य संसारे बद्ध्यते । यदा सः आगमोक्तेन ज्ञानेन, अनुष्ठानेन, मुख्यतया च **'अनन्यशरणभावपुष्ट्या'** भगवत्कृपां लभते, तदा सः प्रकृतेः परं गत्वा भगवतः नित्यकैङ्कर्यम् (सेवाम्) अनन्तानन्दं च प्राप्नोति । एष एव वैष्णवागमानां परमसिद्धान्तः।

स्कन्दपुराणस्य वैष्णवखण्डे श्रीपुरुषोत्तममाहात्म्ये मोक्षस्य यथोचितं निरूपणं क्रियते । **सारूप्यमुक्ति**सन्दर्भे वायसकथा प्रसिद्धास्ति । कस्यचित् वायसस्य (काकस्य) कथामाध्यमेन ज्ञानपादस्य 'मुक्ति'विषयकः सिद्धान्तः अत्र स्पष्टीकृतः । यत्र एकः सामान्यः पक्षी अपि भगवतः दर्शनेन चतुर्भुजरूपं (शङ्खचक्र-गदापाणिः) धृत्वा विष्णुसादृश्यं प्राप्नोति । एतत् **'सारूप्यमुक्तिः'** इति उच्यते ।

श्रीपुरुषोत्तमक्षेत्रमाहात्म्यस्य तृतीयाध्याये **'पुनरावृत्तिरहितमोक्षस्य'** प्रतिपादनं कृतम् अस्ति। यथा –

**सदैकरूपं पुरुषोत्तमाख्यं**
**मुक्तिप्रदं मामिह सम्प्रबुद्ध्य ।**
**अत्र प्रविष्टो न पुनः प्रयाति**
**गर्भस्थितिं सांद्रसुखस्वरूपः ॥**[6]

इदं ज्ञानपादस्य 'कैवल्यम्' अथवा मुक्तिविषयकं ज्ञानम् अस्ति, यत्र जीवः पुनः गर्भवासं (जन्म) न प्राप्नोति ।

विदेहमुक्तिः सायुज्यमुक्तिश्च चतुर्थाध्याये निरूप्येते । विना प्रयासं (ज्ञान-श्रवणादिकं विना) केवलं क्षेत्रे मरणेन मुक्तिः प्राप्यते इति रहस्यम् उच्यते । यथा –

**वेदान्तेषु प्रसिद्धैस्तैर्विज्ञानैः श्रवणादिभिः ।**
**मूढानां दुर्लभैर्विप्रा विनाप्यत्र विमोचनम् ॥**
**अत्र त्यजन्ति ये प्राणांस्तेषां तत्क्षण एव हि ।**

**स्वरूपाज्जायते मुक्ति: संशयो माऽस्तु ते यम ॥**[7]

पञ्चमाध्याये दिव्यदर्शनस्य मोक्षतत्त्वस्य अनुपमनिरूपणं क्रियते । अस्मिन् अध्याये पुण्डरीकाम्बरीषयोः भगवद्दर्शनस्य वर्णनं वर्तते, यत् आगमशास्त्रस्य 'उपासनायाः' तथा 'ज्ञानस्य' पक्षं स्पष्टयति ।

पुण्डरीकस्य स्तुतौ अष्टाङ्गयोगात् अपि भक्तिः श्रेष्ठा इति प्रतिपादितम् । आगमशास्त्रेषु ज्ञानं भक्त्या विना अपूर्णम् इति मन्यते। तत्रोच्यते –

**तन्मे प्रसीद भगवन्पदपङ्कजे ते**
**भक्तिं दृढां वितर नाथ भवाब्धिमुच्चैः ।**
**घोरं सुदुस्तरममुं हि यया तरेय-**
**मष्टाङ्गयोगजनितश्रमवर्जितोऽपि ॥**[8]

यदा भगवान् प्रसन्नो भवति, तदा तस्य मायया निर्मितं सांसारिकं दुःखं नश्यति, साधकश्च दिव्यज्ञानं प्राप्नोति । स एव मोक्षः । तदुच्यते-

**त्रिदशानां स्तुती: श्रुत्वा दिव्यज्ञानौ बभूवतु: ।**
**अपास्त पापनिर्मोकौ साक्षाद्देवमपश्यताम् ॥**[9]

**ऊनविंशाध्याये मोक्षसाधनं दर्शन-ज्ञानं निरूप्यते** । ज्ञानपादे दर्शनस्य महिमा परमोत्कृष्टः अस्ति । केवलं दर्शनेनैव कोटिजन्मनां पापानां नाशः मोक्षप्राप्तिश्च भवति इति अत्र निगद्यते । यथा -

**सुचित्रं पुण्डरीकाक्षं सविलासं सविभ्रमम् ।**
**दृष्ट्वा विमुच्यते पापै: कल्पकोटिसमुद्भवै: ॥**[10]

जीवन्मुक्तस्य स्वरूपं विष्णुभक्तेः सामर्थ्यं च निरूपयन् व्यासो लिखति –

**जीवन्मुक्तो मुनिश्रेष्ठ: सर्वलोकान्भ्रमन्नयम् ।**
**यथानुपहतद्वारस्तथायं मर्त्यवास्यपि ॥**
**भूपति: प्रययौ शीघ्रं विष्णुभक्तिप्रसादत: ।**
**ब्रह्माण्डविषये नैतद्दुष्प्राप्यं वस्तु विद्यते ॥**[11]

आगमशास्त्रे विष्णुभक्तेः प्रभावेण मर्त्यशरीरेणापि दिव्यलोकानां गमनं जीवन्मुक्तिश्च स्वीक्रियते । इन्द्रद्युम्नः मर्त्यलोकाधिपतिः भूत्वापि विष्णुभक्त्या नारदेन सह ब्रह्मलोकं गच्छति । विष्णुभक्तेः प्रसादात् संसारे किमपि दुष्प्राप्यं नास्ति। यथा जीवन्मुक्तः नारदः सर्वत्र अप्रतिहतगतिः भ्रमति, तथैव विष्णुभक्तः राजा इन्द्रद्युम्नः अपि मर्त्यशरीरेण ऊर्ध्वलोकान् प्रति गच्छति ।

**उपसंहारः (Conclusion)**

अस्य शोधलेखस्य विमर्शानुसारं सिद्धं भवति यत् वैष्णवागमोक्त-ज्ञानपादस्य मोक्षसिद्धान्ताः स्कन्दपुराणीय-पुरुषोत्तममाहात्म्ये पूर्णरूपेण व्याव-हारिकं स्वरूपं प्राप्नुवन्ति। अत्र प्रतिपादितं यत् मोक्षः कश्चन शुष्कः वैराग्यमार्गो नास्ति, अपितु सः भगवत्कृपा-भक्ति-शरणागतिभिः आपूर्तः आनन्दमयः साक्षात्कारः अस्ति। पुरुषोत्तमक्षेत्रस्य तादृशं माहात्म्यम् अस्ति यत् तत्र ज्ञानयोग-महोद्योगं विनापि केवलं भगवद्दर्शनेन, क्षेत्रवासेन, शरीरत्यागेन च प्राकृतबन्धेभ्यः विमुक्तिः (जीवन्मुक्तिः विदेहमुक्तिश्च) सम्भवति। अतः अयं ग्रन्थः जीवेभ्यः नित्यकैङ्कर्यप्राप्तये तथा च परमानन्दसन्दोहभोगाय भक्तिप्रधानं सुलभं मोक्षमार्गं प्रदर्शयति।

**सहायकग्रन्थसूची**


1) **स्कन्दपुराणम् (वैष्णवखण्डान्तर्गतं श्रीपुरुषोत्तमक्षेत्रमाहात्म्यम्) -** *प्रकाशकः:* चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी।
2) **अहिर्बुध्न्यसंहिता (पाञ्चरात्रागमीया)-** सम्पादकः: एम. डी. रामानुजाचार्य, अड्यार लाइब्रेरी एण्ड रिसर्च सेन्टर, चेन्नै (मद्रास)।
3) **लक्ष्मीसंहिता** - प्रकाशकः: मिथिक सोसाइटी अथवा प्राच्यविद्यासंशोधनालयः (ORI), मैसूर।
4) **जयाख्यसंहिता** - सम्पादकः: एम्. कृष्णमाचार्य, गायकवाड ओरियन्टल सीरीज (GOS), बरोडा।
5) **पाद्मसंहिता** - प्रकाशकः: पाञ्चरात्र परिसंशोधन परिषद्, भद्रचलम् / चेन्नै।
6) **भृगुसंहिता (वैखानसागमीया)** - प्रकाशकः: राष्ट्रियसंस्कृत-विश्वविद्यालयः (केन्द्रीयसंस्कृतविद्यापीठम्), तिरुपति, आस्कन्धप्रदेशः।


**पाद टिप्पणी**

1. अ.बु.सं. ज्ञा.पा.
2. ल.सं. – १७/६०-६२
3. ज.सं. मो.प.
4. पा.सं.ज्ञा.पा.
5. भृ.सं.ज्ञा.पा.
6. स्क.पु.वै.ख.पु.क्षे.मा.– ३/४३
7. स्क.पु.वै.ख.पु.क्षे.मा. – ४/२८, ३१
8. तत्रैव – ५/३४
9. स्क.पु.वै.ख.पु.क्षे.मा. – ५/७
10. स्क.पु.वै.ख.पु.क्षे.मा. – १९/२८
11. स्क.पु.वै.ख.पु.क्षे.मा. – २२/१०-११